नवमः पाठः

# अहो, सौन्दर्यस्य अस्थिरता



आसीत् कश्चन राजकुमारः। सः नितरां सुन्दरः। स्वस्य सौन्दर्यस्य विषये तस्य महान् गर्वः आसीत्। राज्यनिर्वहणे तस्य अल्पः अपि आदरः न आसीत्। सर्वदा स्वसौन्दर्यविषये एव अवधानं तस्य। तस्य एतां प्रवृत्तिं दृष्ट्वा अमात्यः नितरां खिन्नः अभवत्। राज्यपालने युवराजस्य अनास्थां को वा मन्त्री सहेत? योग्येन उपदेशेन युवराजे जागरणम् आनीय सुमार्गे सः प्रवर्तनीय इति सः निश्चितवान्।

अथ कदाचित् स्वसौन्दर्यवर्धने तत्परं राजकुमारं दृष्ट्वा सः अवदत्- "युवराजवर्य! ह्यः एव भवान् अधिकसौन्दर्यवान् आसीत्" इति।

एतत् श्रुत्वा युवराजः नितरां खिन्नः सन् अमात्यम् अपृच्छत्- अमात्यवर्य! किम् अद्य मम सौन्दर्यं न्यूनम्? किमर्थं भवता एवम् उक्तम्? इति।

यत् अस्ति तदेव उक्तं मया इति गाम्भीर्येण अवदत् मन्त्री।

अद्य मम सौन्दर्यं न्यूनं सर्वथा न। यदि न्यूनम् इति भवान् चिन्तयेत् तर्हि तत् सप्रमाणं निरूपयेत्।

अस्तु, निरूपयामि अस्मिन् एव क्षणे इति उक्त्वा मन्त्री निकटस्थं भटम् आहूय- जलसहितं पात्रम् एकम् आनय इति आज्ञापितवान्। एकं जलपात्रं राजकुमारमन्त्रिणोः पुरतः निक्षिप्य सः भटः ततः निर्गतवान्।

मन्त्री तस्मात् पात्रात् उद्धरणमितं जलम् उद्धृत्य बहिः क्षिप्तवान्। तदनतरं सः तमेव बहिर्गतं भटम् आहूय अपृच्छत्- पात्रस्थलं जलं यथापूर्वम् अस्ति, उत न्यूनम्? इति।

भटः अवदत्- यथापूर्वमेव अस्ति जलम् इति।

तदा अमात्यः राजकुमारं सम्बोध्य अवदत्- एवमेव भवति सौन्दर्यम् अपि। तत् क्षणे क्षणे क्षीयते एव। किन्तु वयं तत् न अवगच्छामः। सौन्दर्यं न स्थिरम्। उत्तमकार्यात् यत् यशः प्राप्येत तत् एव सुस्थिरम्। प्रजापालनं भवतः कर्तव्यम्। तत् श्रद्धया क्रियताम्। ततः उत्तमं यशः प्राप्येत इति।

एतत् श्रुत्वा राजकुमारः स्वस्य दोषम् अवगत्य अनन्तरकाले राज्यपालेन अवधानदानम् आरब्धवान्।

## अभ्यासः

1. अनया कथया का शिक्षा प्राप्यते?
2. यशः सुस्थिरं सौन्दर्यं वा?
3. राज्यपालने युवराजस्य अनास्था कथम् आस्थायां परिवर्तिता?

★★★